M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 492

Title: Trish Aloki Tika

Patan

492

त्रिशश्लोकी टीका on शौच्यनिर्णय.

Trivishat Shloki Tika on Shauchya Nirnaya	Title
	Author
	Editor
	Year, Vols.
	Publisher
492	Remarks

तु नाशौचं ॥ तथा च मरीचिः ॥ गर्भस्रुत्यां यथामासमचिरे तूत्तमे त्र्यहमिति
अचिरे आद्ये मासत्रये उत्तमे ब्राह्मणजातौ त्रयो दिवसा आशौचहेतवः स्युः
मासत्रये त्र्यहमिति गौतमोक्तेः स्मृत्यन्तरेऽपि स्रावे मातुस्त्रिरात्रं स्या
त्सपिंडानामशौचवर्जनमिति एवं मातुराशौचमभिधाय सपिंडानामाह
स्नानशुद्धा सपिंडाः स्युरिति सपिंडाः सप्तपुरुषावसानाः ॥ स्नानेन शुद्धाः स्युः
सद्यःशौचं सपिंडानां गर्भस्य पतने सतीति स्मरणात् एवं सपिंडानां च
तुर्मासादित्रयविशेषेण सद्यःशौचे प्राप्ते पंचमषष्ठयोर्विशेषमाह ॥ अंत्य
इति ॥ षण्णां मासानां मध्ये यदंत्यमासद्वयं पंचमषष्ठाख्यं तत्र सपिंडाः त्रिदि
नमशुचयः स्युरिति संबंधः ॥ पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति
स्मृतेः अत्र पातः पंचमषष्ठयोरिति वचनात् पातशब्दः पंचमषष्ठमासयो

पक्षलक्षणपरः अतएव मासादूर्ध्वं सप्तमाष्टममासयोः सूतिवत्स्यात् आशौच
मिति शेषः सूतिः प्रसवो जननं तत्रैवोक्तं सूतिवत् प्रसवनिमित्तं दशाहं नान्यनि
मित्तमिति यावत् सूतेर्दशाहाशौचनिमित्तत्वं दशाहे शावमाशौचं सपिंडेषु
विधीयते जननेप्येवमेव स्यान्निपुणां शुद्धिमिच्छतामिमनुक्ता प्रसिद्धा तथा
च स्मृतिः षण्मासाभ्यंतरे यावद्गर्भस्रावो भवेद्यदा तदा मास समैस्तासां
दिवसैः शुद्धिरिष्यते ॥ अत ऊर्ध्वं स्वजात्युक्तमाशौचमिष्यते तथा
॥२॥ हारितोपि जातमात्रे मृते तज्जाते वा सपिंडानां दशाहमिति एतत्तस्य चा ॥२॥
तुर्वर्ण्यसाधारणतामाह चातुर्वर्ण्यस्य तुल्यमिति एतदाशौचं चतुर्णां वर्णा
नां तुल्यं साधारणं भवति नात्र कश्चन वर्णकृतो विशेषः ॥ ननु केवलमिदमेव
तुल्यं क्यो वयोस्थाविशेषोपरनिमित्तमपि स्यादाह वयसीति यद्वयो विशेषो
व

परनिमित्ताशौचं वर्णविशेषोपादानरहितेनाविहितं तदपि चातुर्वर्ण्यस्य तुल्यं भ
वति तदुक्तं व्याघ्रपादमुनिना तुल्यं भवति सर्वेषामतिक्रांते तथैव चोक्तं अत्र स्वपु
रुषनिहितत्वेन न परपुरुषनिहिते जननीव्यतिरिक्तानामाशौचाभावो ध्वनितः॥
॥१॥श्लोक॥ षण्मासाभ्यंतरेषु स्वपुरुषनिहिते गर्भमात्रे विनष्टे मातातन्मास संख्या
समदिनमशुचिः स्नानशुद्धाः सापिंडाः॥ ऊर्ध्वं षण्मासद्वये तु त्रिदिनमशुचयो ततः परं स्न
नि वत्स्याच्चातुर्वर्ण्यस्य तुल्यं वयसि तदपि यत्स्राव्यते शौचमात्रं ॥१॥
टीका इदानीं पूर्णप्रसवनिमित्ताशौचं द्वितीयवृत्तेनाह जन्मेति जन्माशौचांतराले
जन्माशौचमध्ये नालच्छेदात्पूर्वकाले नालच्छेदादनंतरे यद्विशिशोर्नशने उपरमस्या
त् अथवा प्राणापगतो निर्गमे निर्गच्छति तज्जननजनिते जन्मनिमित्ताशौचे कृस
पूर्णे नशावाशौचं न जननाशौचानुवृत्तिः किंतु जन्माशौचेनैव शिशूपरमनिमित्ता
शौचं निवृत्तिरिति भावः तदुक्तं बृहन्मनुना॥ दशाहाभ्यंतरे बाले प्रमीते तस्य बांध

वैः शावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयत इति यदि चेज्जननानंतरं नालछेदात्
प्राक् निधनमुपगतस्तर्हि सर्वेषां पित्रादीनां त्र्यहेणैव शुद्धिः स्यादिति शेषः इहवि
षये सूतिकाया मातुस्तु सकलकं संपूर्णदशाहं प्रसवनिमित्तं स्यात् शावशुद्धिः स्त
। सद्यःप्रसवनिमित्तमेव भवति न शावमिति भावः जीवञ्जातो यदि मृतो मृतः सूत
क एव वा सूतके सकलं मातुः पित्रादीनां त्रिरात्रकमिति यावन्न छिद्यते नालं ताव
न्नाप्नोति सूतकं छिन्ने नाले ततः पश्चात् सूतकं तु विधीयत इति वचनात् २ श्लोक ॥२॥
॥२॥ जन्माशौचान्तराले यदि शिशुनशनं नालवर्धे च कालेग्निः प्राप्यानिःपते ह्यज
ननजनितमाशौचमस्यैव कृत्स्नं ॥ प्राङ्नाभिछेदनाद्वेन्निधनमुपगतस्तत्र्यहे
णैव शुद्धिः सर्वेषां सूतिकायास्त्वह च सकलकं प्रेतशुद्धिस्तु सद्यः ॥२॥ टीका
एवं कालविशेषेण दशाहाद्याशौचापवादमभिधाय वयोवस्थाविशेषादपि तदपवा
दं तृतीयेनाह स्नानं प्राङ्नामतः प्राक् नामकरणात्सद्यः परेते उपरते बालेऽस्मि

न् स्नानमात्रं न तन्निमित्तमाशौचं प्राङ्नामकरणात्सद्यः शुद्धिरिति शंखस्मृतेः नाम
करणादूर्ध्वं दशनजननतः दंतजननादर्वाक् परेते प्रेते अग्निदग्धे अहः एकरात्रं अहस्त्व
दत्तकन्यासु बालेषु च विशोधनमिति याज्ञवल्क्यस्मरणात् अदग्धे तु सद्यः शुद्धि
स्नानमात्रं आदंतजन्मनः सद्य इति वचनात् तदुपरि दिनमाव्यब्दतश्चौलशून्ये तदु
परि दंतोद्गमादूर्ध्वं यावत्त्रिवर्षं चूडाकरणा हिते परेते दिनमेकाहं अचूडे नैशिकी स्मृते
रिति वचनात् कृतचौले तु त्रिरात्रमित्याह ॥३॥ श्लोक
स्नानं प्राङ्नामतो वाग्दशनजननतोऽहः परेतेऽग्निदग्धे दग्धे वा तत्रापि सद्यस्तदुपरि
दिनमाव्यब्दतश्चौलशून्ये सचौले तु त्रिरात्रं त्रिदिनमितरथाप्याव्रताज्ञात्यशौचं मा
तापित्रोस्तत्सुते त्रिदिनमदशने सन्निधौ नष्टचेष्टे ॥३॥ सचौल इति
सचौले कृतचौले परेते त्रिरात्रं निरूढचूलकानां तु त्रिरात्राच्छुद्धिरिष्यत इति मनु
वचनात् वर्षत्रयानंतरं यावदुपनयनं त्रिरात्रमित्याह त्रिदिनमितरथाप्याव्रतादी

दिति अंन्यथा अकृतचौले अपिशब्दात् कृतचौलेपि संस्थिते तदुपरिवर्षत्रयाहर्वा
उपनयनात्प्राक् त्रिरात्रं तथाचायमर्थः प्रथमाब्दे कृतचूडस्यापि यावत्तदुपनयने
त्रिरात्रमिति त्रिरात्रमात्रं तादृशादितिवचनात् एवं वयोवस्थाविशेषेणाशौ
चविशेषमभिधाय जात्याशौचमाह जात्याशौचमिति तदुपरि उपनयनानंतरं जा
त्याशौचं दशाह दिक्कमितियावत् दशरात्रमतःपरमितिवचनात् एवमविशे ॥५॥
॥५॥ षेणजातदंतमरणे मातापित्रोरपि सद्यःशौचादि प्राप्ते तदपवादमाह माता श्रा
पित्रोस्तु पुत्रइत्यादिना अदशने अजातदंते मृते मातापित्रोस्त्रिरात्रमेव बाल
नामजातदंतानां त्र्यहाच्छुद्धिरिति कश्यपवचनात् वैऊर्ध्वादनुसंधानादनुरूप्या
दध्यं त्र्यहमितिस्मृत्यंतराच्च एतत्सर्वं स्नानं प्राङ्नामतो कार्त दशनजननतोहःप
रेतद्रात्यादिनोक्तं संन्निधौशिशुमरणे वादित्यमित्याह संन्निधौनष्टचेष्टइ स
न

न्निधौ समीपे नष्टा चेष्टा यस्य तस्मिन्मृतइतियावत् आसन्निधौशिशुमरणे अंति
क्रांताशौचमेतन्नभवतीतिभावः तदुक्तं व्यपादमुनिना उपनीतेतु विषमं तस्मिन्नेवा
तिक्राजमिति ३ अथ चतुर्थवृत्तं तत्रादौ पद्यस्यायमर्थः जन्मनतुर्यऊनह्यशब्दे अ
पर्णाद्वर्षे असंज्ञेगतसंज्ञेमृतमितियावत् जनिवरः पिताजननी माता सोदराः भ्रा
तरक्षेतेषां दशाहशौचमित्येकः पक्षः गर्भस्थिप्रेते मातुर्दशाहं जातेउभयोः कृतनाम्नि
सोदराणामिति पग्यवचनात् पक्षांतरमाह यद्वेति अथवा पित्रादित्रयस्य त्रिरा
आशौचे अस्पृश्यत्वमेवाधिकं। तत्रपक्षे सूतकं कर्मानधिकारिलक्षणं त्रिरात्रं
सापिंडैः सहसमानमितिभावः एतच्चपक्षद्वयं त्रिरात्रं दशरात्रं वाशावमाशौचरि
प्यते ऊनाद्विवर्षे उभयोः सूतकं मातुरेवाहीत्येतद्व्याख्यानसमययोर्विज्ञानेश्वरा
चार्यैः स्फुटीकृतं अथ स्त्रीषु वयोवस्थाविशेषादाशौचविशेषमाह करोस्तत्तर
हेन स्त्रीचिति नामकरणादूर्ध्वं क्षौरकालादर्वाग्यावत्क्षौरकालं मृतास्त्रीषु

कन्यासु त्रिपुरुषविषयेया । वत्रिपुरुषं योज्ञातिः स स्नानमात्रेण शुद्ध्येत् अत्र त्रिपुरुष
विषये इत्यनेन कन्यानां सापिंड्यं त्रैपुरुषं अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायते न व
सिक्रममभिमतं एतच्च सद्यः शौचं अचूडायां कन्यायां सद्यः शौचं विधीयत इति आप
स्तंबोक्तेश्च इयं चूडाकरणदनंतरं वाग्दानादर्वाक् अह्ना एकाहेन ज्ञातिः शुध्येदिति
पूर्वेण संबंधः अहः स्वदत्त कन्यासु बालेषु च विशोधनमिति स्मरणात् त्रिभिरूपन
यनात् वैद वाग्दानादूर्ध्वमुपनयनाद्विवाहाद्वार्वाक् भर्तुः परिणेतुः गोत्रे स्वके च पितु
॥५॥ र्गोत्रे त्रिभिर्दिनैः शुध्येत् इयं च शुद्धिः स्त्रीणामसंस्कृतानां नानुच्य हापुध्यंति बांधवाः ॥५॥
यथोक्तेनैव कल्पेन शुध्यंति तु सनाभय इति मनूक्ता वेदितव्या ४ ॥ अनद्धं बेत्वसं २५
जनिक रजननी सोदराणां दशाहं यद्वा स्पर्शेनैव बाधिकमिह विषये सूतके नु
त्रिरात्रे स्त्रीषु स्नानेन शुध्ये त्रिपुरुषविषये ज्ञातरा क्षोरकालादर्वाग्वाग्दाने ना
त्रिभिरूपनयनादूर्ध्वं गोत्रे स्वके च ४ जन्मन्योपेत मृत्यावापि च दशानिशा

८ दशाहानि पक्षं मासं वर्णाः क्रमेणाशुचयः उ-चित द्वृ द्विजातिस्तु पक्षं वानप्रस्थ
यतो चापरं मतिकुलजं पद्रके चा ल्लवस्या द्योषि विप्रमं गुस्येम नवति च
दिन युद्ध विद्वेतु सद्यः ॥५॥ टीका एवं चतुर्वर्णसाधारणीं शुद्धिमुक्त्वा वर्णवि
शेषेण दशाहाशौचापवादं पंचमवृत्त पूर्वार्द्धेनाह जन्मीति जन्मनि जनना शौ
चे उपेत उपनीतः कृतोपवीतः संस्कारः उपेत एव औपेतः तस्य मृत्यावुप
नीतादि मरणे ब्राह्मणाद्याश्चत्वारो वर्णाः क्रमेण दशनिशादिकालमशुच
यः स्युः ब्राह्मणो दशाहं वैश्यः पक्षं पंचदशाहं शूद्रो मासं पक्षद्वयं इति क्र
मः उचितं तु पाकयज्ञादि द्विज शुश्रूषादि विहितकर्मानुष्ठान शीलः शूद्रः पक्ष
पंचादशादिनमात्रमेवाशुचिः न तु मासं क्षत्रस्य द्वादशदशाहानि विशः पंचद
शेव तु त्रिंशाद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिन इति वचनात् इदानीमुत्त

गोर्द्धं न कुलसंबंधिपुरुषोपरमे दशाद्याशौचापवादमाह वानप्रस्थ इति कुऊंल
ऊस्ववंश्ये वानप्रस्थे तृतीयाश्रमिणि यतौ तुर्याश्रमिणि षंढके क्लीबे चोपरम
ति उपरते आप्लुत्य स्नानमात्रं शुद्धिकरणमिति यावत् योषिद्गोविप्रगुप्त्यै त
द्रक्षणाय मृतवति शुद्धधातेन कालांतरम् तेनुदिनमेव शुद्धिहेतुः ब्राह्मणा
र्थे विपन्नायेयोषितां गोग्यहेपि वा आह वेचहतानां वा एकरात्रमाशौचमिति
॥६॥ स्मृतेः उद्यतैराह वैशस्त्रैः सधर्महतस्य च सद्यः संतिष्ठते यज्ञस्तथाशौचमिति ॥६॥
स्थितिरितिमनुवचनाच्च ५ एतत् ज्ञातमेवाशुद्धिनिमित्तमिति वृद्धैर्निर्णीमतोज्ञा
नानंतरमुत्सर्गतो दशाद्याशौचप्राप्तौ क्वचिद्देशकालादिभेदेन तदपवादमाह ॥
शावे तीत इति षष्ठेन वचनेन शावेशावाशौचे दशाहात्प्रभृति दशाहादिके अती
ते अतिक्रांते दशातीनानंतरं ज्ञातयइति यावत् विषयक इति यास्मिन्देशेम्तीति

तत्रैव ज्ञातं त्रिमासात्प्राक् प्रथममासत्रये त्रिरात्रं त्रिमासानंतरं आषण्मासात् ष
ण्मासं यावत् पक्षिणी पूर्वापरादिनाभ्यां युक्ता रात्रि रशुद्धिनिमित्तं षण्मासादूर्ध्वं
यावन्नवमासपर्यंतं दिनमहोरात्रं ततो नवमासोपर्यंतं दिनमहोरात्रं ततोनव
मासादूर्ध्वं स्नानमात्रं स्यादितिसंबंधः देशांतरमृतिश्रवणे अविशेषेण त्रिमा
सादावपि स्नानमेवेत्याह स्नानं देशांतरस्थे इति मासत्रये त्रिरात्रं स्यात्षण्मासे
पक्षिणी तथा अहः स्यात्तु नवमादर्वाक् ऊर्ध्वं स्नानेन शुध्यतीति वृद्धवसिष्ठवचनात्०
देशांतरमृतं श्रुत्वा क्लीबे वैखानसे यतौ मृते स्नानेन शुध्यंति गर्भस्रावे च गोत्रिण
इति स्मृतेः सतरांच देशांतरलक्षणं त्वाह बृहस्पतिः महानद्यंतरं यत्र गिरिर्वा व्यवधा
यकः वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते देशांतरं वदंत्येके दशयोजनमायतमिति०
चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये वदंति चेति एतस्यापवादमाह अथापित्र विषयद्
ति देशकालाविशेषात्सर्वदेशे सर्वकाले च पितुर्मातुश्च मरणे सुतानां स्वस्वजा

निर्दिष्टं दशाहादिकमेव पित्रविषय इत्यत्र पिता च माता च पितरौ तौ विषयौ यस्येति
समासः पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः श्रुत्वा तद्दिनमारभ्य दशाहं सूत
कीशौचीति वचनात् अपरमातुर्विशेषमाह मातुः सपत्न्यास्त्रिदिनमिति अपरिमा
तरिमृतायां पुत्रस्य देशकालाविशेषेण नवममासादूर्ध्वं च त्रिरात्रं पितृपत्न्याम
पेतायां मातृवर्ज्यं द्विजोत्तम संवत्सरे व्यतीतेपि त्रिरात्रमशुचिर्भवेत् अत्राशौचश
ब्दग्रहणेनातिक्रान्ते जन्माशौचे शुद्धिर्नैवेति सूचितं तथा चोक्तं नाशुद्धिः प्रसवाशौ ॥७॥
॥७॥ चे व्यतीतेषु दिनेष्वपीति देवलेन एतदतिक्रान्ताशौचं सर्ववर्णसाधारणमित्या
ह इदमतिक्रान्ताशौचं समानमिति इदं अतिक्रान्तिरतिक्रमः तत्संबंध्याशौचं
आशौचं तत्समानं सर्ववर्णसाधारणमित्यर्थः प्रोषिते कालशेषः स्यादशेषे त्र्य
हमेव हि सर्वेषां वत्सरे पूर्णे प्रेते दत्त्वोदकं शुचिरिति वचनात् तुल्यं सर्वेषाम
तिक्रान्ते तथैवं चेति व्याघ्रपादवचनाच्च ६

शावेतीते दशाहात्प्रभृति तद्विषयके प्राक् त्रिमासात्त्रिरात्रं पक्षिणी षष्ठमासा
द्दिनमिह नवमात्स्यात् ततः स्नानमात्रं स्नानं देशान्तरस्थे त्वथ पितृविषये देश
कालाविशेषात्स्वस्वमातुः सपत्न्यास्त्रिदिनमिदमतिक्रान्त्यशौचं समानं ६
एवं स्वकुलोत्पन्नस्य मृताशौचमुक्त्वा कुलान्तराश्रितानामपि मृतानामाशौचमा
ह ससमाद्दिरिभिर्दिनैः पित्रोरित्यादिभिः पित्रोर्मातापित्रोर्गेहे समूढा प्रसवमर
णयोः सम्यगूढायाः परिणीतायाः ये प्रसवमरणे तयोः पित्रादिकानामेकरा
त्रत्रिरात्रे स्यातां यदा पितृगृहे परिणीतकन्या प्रसूता मृता वा भवति तदा
अस्याः पित्रादिकानां क्रमादेकरात्रात्रिरात्रौ प्रसवे एकरात्रं मरणे त्रिरात्रमि
त्यर्थः अत्र पित्रोर्गेह इत्यनेन भर्तृगेहे प्रसूतायां मृतायां वा पितृपक्षाणां सर्वेषां
आशौचाभावो दर्शितः तथा च विष्णुवचनं संस्थितासु स्त्रीषु नाशौचं पितृपक्षे त
त्प्रसवमरणे चेत्पितृगृहे स्यातां एकरात्रं त्रिरात्रं चेति अथापत्नमरणे सठपु ८

स्यात्त्रिरात्रमित्यत्राथशब्देनाधिकारांतरसूचना ऊढपुत्र्यापरिणीतकन्यया:
पितृमरणे मातापित्रोर्मरणे त्रिरात्रं पित्रोरुपरमे स्त्रीणां तु ऊढानां तु कथं नवेत् त्रिरात्रेणे
पित्रोर्गेहे समूढाप्रसवमरणयोरेकरात्रं त्रिरात्रे स्यात्तं पित्रादकानामथ पि
तृमरणे ऊढपुत्र्यास्त्रिरात्रं प्रेते चाथवार्यमातामह दुहितृ सुत श्रोत्रियर्त्विक्
याज्यस्वस्त्रियेषु त्रिरात्रं त्रिदिवसमशुचिसोदरे स्तेनयत्र ७
वशुद्धिः स्यादित्याह भगवान्यम इति वृद्धयाज्ञवल्क्यस्मरणात् प्रेते चाचार्यमाता
॥८॥ महदुहितृसुतश्रोत्रीयर्त्विक्याज्यस्वस्त्रीयेषु त्रिरात्रं उपनयनेपूर्वकं वेदाध्याप ॥८॥
क आचार्यः एकदेशाध्यायन क्षमः श्रोत्रियः ऋत्विक् आध्वर्यवादियज्ञकर्मकृ
वत् स एव याज्यः यजमानसहितः शेषाः प्रसिद्धाः एतेषु मृतेषु त्रिरात्रे सोदकृ
स्तु भयत्रेति समानो वरः सप्तपूरुषानंतरं सप्तपूरुषावसानः स उभयत्र जात
शौचमृताशौचे च त्रिदिवसमेवाशुचिः अशुद्धः स्यात् अथाह बृहस्पतिः

स्यतं मातामहाचार्यश्रोत्रियेष्वशुचिर्भवादिति प्रचेताश्च मृते चार्त्विजि याज्ये च
त्रिरात्रेण विशुध्यतीति वृद्धयाज्ञवल्क्योपि संस्थिते पक्षिणीरात्रौ दौहित्रे भगि
नी सुते संस्थिते तु त्रिरात्रं स्यादेव धर्मोऽव्यवस्थित इति मनुरपि अन्ये त्वेके द
शान्तं तु त्रिरात्रात् शुद्धिरिष्यते शास्त्रशो विशुध्यंति त्र्यहादुदक दायिन इति
७ अथाष्टमं वृत्तं पक्षिण्याशौचमिति ऋत्विगादयो भागिनेयांताः प्र
सिद्धाः तेषां प्रयोगो मृत्याविति यावत् मातामह्यां चावरतायां पित्रोः स्वसरि
मातृष्वसरी चावरतायां मातुलान्यां मातुलपत्न्यां चावरतायां मातुले च वि
रते पक्षिणी अशौचं आशौचकारणं अथा सज्योतिरि स्वविषय न पतौ स्वदे
शाधिपतौ नष्टे मृते ग्रामनाथे च नष्टे सज्योतिरेव कालः शुद्धिहेतु समानं ज्यो
तिरादित्यो नक्षत्रं वा से यस्मिन् सज्योतिः दिवा नष्टे यावन्नक्षत्रदर्शनं अशुद्धिः न

क्षत्रदर्शनाच्छुद्धिः रात्रिमृते तु रात्र्यवसानपर्यंतमेवाशुद्धिः सूर्यदर्शनाच्छुद्धिरित्य
र्थः अत्र यद्यपि पूर्ववचने त्रिरात्रमुक्तं तेषां पुनः पक्षिणी कथनं देशकालादिभेदेन
व्यवस्थापनीयं एतस्य पक्षिण्याभिधानस्य श्वश्रुरयोश्च भगिन्यां मातुलान्यां
च मातुले पित्रोः स्वसरि तद्वत् पक्षिणीं क्षपयेन्निशामिति तथा च मातुः श्वश्रुरोपत्ने
गुरौ गुर्वंगनास्वपि च आशौचं पक्षिणी सर्वामृता मातामहीयादिति तथा च प ॥८॥
॥८॥ क्षिणी सपिंडे योनिसंबंधे सहाध्यायिनि चैव स्यादेव वचनानि मूलं ज्योतिरेवस्व
प्रेते जारा जनि सज्योतिर्यस्यादूषये स्थित इति मनुवचनं मूलं व्योमश्वेरकुल
पतेः श्रोत्रिये वा तत् पार्श्वे पक्षिण्याशौचं मृत्विग्दुहितृ तस्तत सहाध्यायि बंधुत्रयं
तेनास्य श्वश्रुस्तु मित्र श्वश्रुर भगिनीकान्तागिनिय प्रयाणे मातामह्यां चापत्यैः
स्वसरि च विरतो मातुले मातुलान्यां चाथो सज्योतिरेव स्वनिषयन्तपतोग्ना

मनाप्येच विनष्टे ८ निशिष्येपंचत्वमापन्नेऽशुद्धिर्नक्षत्रदर्शनात् इति दक्षयाज्ञ
वल्क्यवचनं मूलं ८ अध्यनवमवृत्ते शिष्येति एकदेशाध्यापके उपाध्यायः अ
नूचानोंगप्रवक्ता सगोत्रश्चतुर्दशपुरुषानंतरं सप्तपुरुषावोसानः इतरस्तस्यैष ए
तेषु शिष्यादिषु प्रमीतेषु एकरात्रमहोरात्रमाशौचमिति विशेषः तथा स्वगृहपरमृतौ
मातुले चैकरात्रं तथा स्वब्रह्मचारिणि चैकरात्रं एकाचार्योपनीतः ब्रह्मचारी गुर्व
ति वा अस्य नूचान श्रोत्रियेषु मृतेषु चेति यज्ञकल्पस्मरणात् बंधुत्रयमग्रहेषे
नास्य बंधवः पितृबंधवो मातृबंधवश्चोपगृह्यन्ते विज्ञानेश्वराचार्यैर्व्याख्या
तत्वात् त्रिरात्रौ दूराशौचमाचार्यसंस्थिते सति तस्य पुत्रे च पत्न्यां वा दिवारात्रमि
ति रुद्रनिगमनुस्मरणात् ग्रत मेकादशानातुगा त्रजानामहः स्मृतमिति जा
बालिमवचनात् असपिंडेषु स्ववेश्मनि मृते त्वेकरात्रमिति विष्णुस्मरणात् अ

त्रराषं पुनर्ग्रहणं तेषां असान्निध्यानोदिनाद्यवस्थादृष्ट्वा श्रोत्रियस्य समानग्रामी
णस्येति व्याख्येयं ९ एकाहं सब्रह्मचारिणी समानग्रामिणोऽपि स्याच्चलाय ९ नववचनो
त्र अथतु कथमपि स्वल्प बैधें संबंधयुक्ते स्नानं वासोयुतं स्यादित्यत्र अथशाब्दो
धिकारांतरसूचनार्थः कथमपि केनापि प्रकारेण स्वल्पेनापि संबंधेन संबधिनी
भगिन्यादौ संस्थिते वासोयुतं सचैलं स्नानं स्यात् नान्यादित्यर्थः तदुक्तं याज्ञ
वल्क्यमुनिना भगिन्यां संस्थितायां तु भ्रातर्यपि च संस्थिते मित्रजामातरि प्रेते ॥१०॥
॥१०॥ दौहित्रे भगिनीसुते लंशालके तत्सुते चैव सद्यः स्नानेन शुध्यतीति इदमथ
शिष्योपाध्याय बंधुपुत्र यगुरुतनया चार्यभार्यासगोत्रान् सौ न श्रोत्रिये पुरस्व पा
गृहपरम्नौ मातुले चैकरात्रं रात्रीं सब्रह्मचारिण्यपि तु कथमपि स्वल्प बंधे सं
अयुक्ते स्नानं वासोयुतं स्यादिदमपि सकलं सर्ववर्णेषु तुल्यं ९
ते सकलमाशौचं सर्ववर्णेषु तुल्यं साधारणमिति स्पष्टमेवेतत् ९ आशौचां

तरानिपाने तन्निर्णयं दशम श्लोकेनाह बृहदाशौचस्य प्रवृत्ताशौचस्य मध्ये यदि
तु पुनर पतने रं अन्यदपि समं दशाहाशौचमध्ये दशाहमाशौचं स्वल्पकं रात्रि
रात्रादिकमाशौचं वा सजातिसमानजातीयं जातो शौचमध्ये जाताशौचं मृता
शौचमध्ये मृताशौचं वा भवती तदा पूर्वशेषेण शुद्धिः समं स्वल्पकं वेत्यनेन न
स्वल्पाशौचं मध्यपतीतस्य दीर्घाशौचस्य पूर्वेण शुद्धिरित्यावादितं तदु
क्तमुशनसा स्वल्पांशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि न पूर्वेण विशुद्धिः
स्यात्स्वकालेनैव शुध्यतीति प्रेतेजातं नंतरं जातथा प्रेते प्रेताशौचमध्ये यदि जा
यं तरं विजातीयं ऊननाशौचं भवती तदानु पूर्वेमृताशौचेनैव शुद्धिः एतेजा
ताशौचमध्ये संजातस्य प्रेताशौचस्य न पूर्वेण शुद्धिरित्या ज्ञापितं शावेनशु
ध्यतीति सूतिनः सूतिः शावशाव शोधिनीति स्मृतेः द्वाभ्यां तद्रात्रि शेषे रात्रिमात्रा

वशेषे यद्यशौचांतरं पूर्वोक्तं भवेत् तदा द्वाभ्यां अपरदिनाभ्यां शुद्धिः त्रिभिरपरदिनैर्या
मिनीयामशेषे यामिन्या रात्रेः यामः प्रहरस्तन्मात्रावशेषे तुरीयप्रहरशेषे त्रिभि
रपरदिनैः उत्तरदिवसैः शुद्धिः पूर्वाशौचादधिकात्रिभिर्दिनैः शुद्धिः न पूर्वाशौचशे
षमात्रेणेति भावः रात्रिशेषे सति द्वाभ्यां प्रभाते तु स्त्रिभिः स्मृतेति गौतमवचनात्
पित्रोर्विशेषमाह नेत्याशौचेन पित्र्यमिति अन्याशौचमध्ये यदि स्यात् तदपि पित्र्यं मातृ
पितृसंबंधि तत् पूर्वशेषेण नैव शुध्येत् पितुरुपरमे मातुर्वा उपरमे तद्दशाहमेवाशु ॥११॥
॥११॥ द्धिरिति भावः तयोर्मातृपितृनिमित्तयोः परस्परसंनिपातेपि पूर्वशेषेण शुद्धिः
किंतु मात्राशौचमध्ये पतितस्यापि पित्राशौचस्य न संकोचः मातुर्विशेषमाह पितु
रुपशमने पक्षिणी मातृमृतावपि पितुरुपशमने पित्राशौचमध्ये मातृमृत्यौ
मातुर्मरणे जाते सति पक्षिणी अधिका अशुद्धिहेतुर्न तु यावत् दशाहमिति भावः
तथा च स्मृतिः मातर्यग्रे प्रमीतायां अशुद्धौ म्रियते पिता पितुः शेषेण शुद्धिः स्या

न्मातुः कुर्यात्तु पक्षिणीमिति श्लोकः बह्वाशौचस्य मध्ये तु परमपि समं स्वल्पकं वा
सजाति प्रेते जातं यत् अंतरं वा यदि भवति तदा पूर्वशेषेण शुद्धिः द्वाभ्यां तु रात्रिशेषे त्रि
भिरपरदिनैर्यामिनीयामशेषे नैवाशौचे नापि पित्र्यं पितुरुपशमने पक्षिणी मातु त्र
मृत्यौ १० अथैकादशं वृत्तं सर्वेति सर्वमिदमाद्याशौचं यद्याशौचांतमध्ये
एवं विदितं ज्ञातं भवति तदा शेषमात्रेण दशाहमध्ये यावंतः अवशिष्टानि दिनानि ता घा
वन्मात्रेण शुद्धिः न तु ज्ञातदिनादारभ्येत्यर्थः एवं त्रिदिनाशौचेपि द्रष्टव्यं प्रोषिते
कालशेषः स्यादिति याज्ञवल्क्यस्मरणात् दाताहादाहिताग्नेर्दशाशौचं अ
हिताग्नौ साग्निके मृते दाहात् दाहदिवसतः दशाहं कुर्यात् न पुनर्मरणदि
वसतः अन्यत्र अनाहिताग्नौ तु मरणदिवसतः कुर्यात् न तु दाहदिवसतः अन
ग्निमतः उत्क्रांतेः साग्नेः संस्कारकर्मणः शुद्धिः संचयनं दाहान्मृताह स्मृत्यर्थानि चैव
गिरा वचनात् आशौचांते यत्र स्याच्छुद्धिर्भवति तदाह पूर्णेस्मात्तेति पूर्णे आशौ

चेसचेलं सवस्त्रं यथा भवति तथा स्नात्वा विहिताहितकृतौ वेदोक्तः स्वाऽधिकारके दे
वपितृकार्ये अर्हकाः योग्याः स्युः ज्ञातय इति शेषः सूतिकायां विशेषमाह सूतिकाऽपि
ति सूतिका तु पुनस्त्रिंशद्रात्रं विहिताहितकृतौ पितृस्मरकार्ये योग्या न शुद्धा न भ
वति सूतिका तु पुनस्त्रिंशद्रात्रं ... विशेषमाह विंशति पुत्रसूस्त्विति पुत्र
वतीत्यर्थः एतत्कन्याप्रसवे पुत्रप्रसवे विशेषमाह विंशति पुत्रसूस्त्विति पुत्र
जननी तु विंशद्रात्रं उभयकार्ये योग्या न भवतीत्येवान्वयः सूतिकां पुत्रवतीं विंश
द्रात्रेण कर्माणि कारयेत् मासेन स्त्रीजननीमिति पैठीनसिस्मरणात् ११

॥१२॥ सर्वत्राशौचमन्तर्यद्दिवादि तन्निमित्तं शेषमात्रेण शुद्धिर्दाहादानात् तान्नोमरण ॥१२॥
दिवसतोऽन्यत्र कुर्याद्दशौचं पूर्णे स्नात्वा सचेलं विहिताहितकृतावर्हकाः सूतिका
तु त्रिंशद्रात्रं न योग्या पितृस्मरकरणे विंशति पुत्रसूः सूः ११
... दिवसमशुचिर्भवति ए
अथ द्वादशरात्रं निर्हृत्येति अन्यसमपिण्डं सवर्णं निर्हृत्य दिवसमशुचिर्भवति तस्मिन्
न दहो रात्रमतद्गृहवासिनो तदन्नभोजिनः ह्येयत गृहवासिनस्तदन्नमरणादतस्मि
रात्रे तदन्नाशी नस्तु दशरात्रं ज्ञेयं तथा च मनुः असपिण्डं मृतं प्रेतं विप्रो निर्हृत्य बन्धुवत्

विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् यदन्नमत्ति तेषां तु दशाहेनैव शु
ध्यति अनदन्नन्नमह्नैव न चेत्तस्य गृहे वसेत् इति अथा सर्वस्नेहवशान्नि
र्हृत्य तदुक्ताशौचं यः अज्ञातीनस्य निर्हरणं तस्मै उक्तमाशौचं यस्य तथाहि
तथा हि छत्रं निर्हृत्य तदा मासमशुचिः तथाभ्युदयश्चेद्ब्राह्मणं तदा दशाहमित्यादि
ज्ञेयं एवमेव स्वच्छन्दो पूर्वे वर्णमुपस्पृशेत् पूर्वो वरं तत्र तच्छब्दोक्तमाशौचमिव
चनात् अत्र निर्हरणोपस्पर्शशब्दाभ्यां प्रेतवहनं वक्ष्यते एतस्याप्यपवा
दमाह अथानाथमिति अनाथं प्रेतं निर्हृत्य आद्यक्रतुशतफलभाग्भवेत्
आद्यक्रतु ज्योतिष्टोमः आप्लवेनैव शुध्येत् स्नानमात्रेणैव शुद्धो भवेत् एवं प्रका गु
निर्हृत्यान्यं प्रमीतं दिवसमशुचिः कथासवर्णे तदुक्ताशौचापानाथमाद्यक्रतुशत
फलभाग् आप्लवेनैव शुध्येत् नीलोपाध्याय माता पिता परमगुरुब्रह्मचारीन दोषीते
भ्यो न्यान्निर्हृतोऽस्य व्रतमपि वितनं भ्रश्यते वक्ष्यमेव १२ रणात्स्नानं तरमाशौचाभिर्हर्तृनिः

प्रतिपादिता तथाह पराशरः अनाथं ब्राह्मणं प्रेतं ये वहंति द्विजातयः पदेपदे यज्ञ
फलमानपूर्व्याल्लभंतिते नतेषामशुभंकिंचित्पापंवाशुभकर्मणां जलावगाहनात्ते
षांसद्यःशौचंविधीयतइति अथब्रह्मचारिणोविशेषमाह नोत्क्षिप्तइउपाध्यादीनि
तानिहृत्यब्रह्मचारीनदोषीदोषभाग्भवेदितिब्रह्मचारीव्रतान्नच्यवतइतिच आचा
र्योपितउपाध्यायांनिहृत्यापिव्रतीव्रतीतियाज्ञवल्क्यवचनात् अन्यनिर्हरणेदोषमा
ह तेभ्योन्यामिति तेभ्यःउपाध्यायादिभ्यः अन्यान्निर्हरतःअन्यनिर्हरणंकुर्वतोस्य
॥१३॥ ब्रह्मराचिणःवितत्वंविस्त्रतंचिरार्जितमितियावत् व्रतमपिअवश्यंभ्रश्यतीब्रह्मचार्यु ॥१३॥ न्य
तोभवतीत्यर्थः ब्रह्मचारिणाःशवकर्मणिव्रतांनिवृत्तिआत्रमातापित्रोरितिवचनात्
१२ एवंनिर्हरणोरेशौचयुक्ता अनुगमनाशौचंत्रयोदशवचनेनाह तुल्येति तुल्ये
त्कृष्टानुयानेब्राह्मणस्यब्राह्मणानुयानं एवंक्षत्रियादेरपिस्वस्ववर्णानुयानंतु
त्कृष्टानुयानेतुक्षत्रियस्यब्राह्मणानुयानं तथावैश्यस्यक्षत्रियस्यब्राह्म
ण्यानुयानं तथाशूद्रस्यद्विजातीयानुगमनं तत्रैतत्रतुल्योत्कृष्टानुयाने तस्मिन्नुक्ते

मु

वसनसहितःसवस्त्रःअंभसिनद्यादावाप्लुत्यस्नात्वावह्निंस्पृष्ट्वाअज्यंघृतंप्राश्यवि
तुल्योत्कृष्टानुयानेवसनसहितकोंभस्यवाप्लुत्यवह्निंस्पृष्ट्वाज्यंप्राश्यशुध्येद
थदिनमशुचिर्हीनवर्णानुयाने पक्षिण्येकांतराानुउक्तउनद्भतभवेद्धंतरत्ने
त्रिरात्रंकृत्वास्नात्वास्कृनद्यामसकृयमनशतंसार्पिराशंचकुर्युः १३
शुध्येत् प्रस्मितमेतद्वाक्यार्थकथनं तत्रच अनुगम्येच्छयाप्रेतंज्ञात्वातियज्ञाति
वा स्नात्वासचैलःस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यतीतिमूलं हीनानुगमना
शौचमाह अथादनमिति ब्राह्मणादेःक्षत्रियाद्यनुयानेअनुगंताब्राह्मणा
दिनमहोरात्रमशुचीर्भवतीतिशेषः पक्षिण्येकांतरेति एकांतरानुयाने
ब्राह्मणस्यवैश्यानुयानेक्षत्रियस्यशूद्रानुयाने पक्षिणीअशुचितानि
मित्तंभवेतद्धंतरत्वोत्रिरात्रंद्व्यंतरत्वेब्राह्मणस्यशूद्रानुयाने त्रिरात्रं अनुगंता

ब्राह्मणा अशुचिर्भवंतीति संबंधः त्रिरात्रानंतरं कृत्यमाह त्रिरात्रं कृत्वा सनद्या
मुत्तमजले स्नात्वा असकृयमनं प्राणायामः तच्छतं कुर्युः तदनंतरं सर्पिराशं घृत
प्राशनं च कुर्युः एवं शुद्धा भवंतीत्यर्थः तथा च पराशरः प्रेतीभूतं तु यः शूद्रं ब्राह्म
णो ज्ञानदुर्बलः अनुगच्छेन्नियमानं स त्रिरात्रेणाशुध्यति त्रिरात्रे तु ततश्चीर्णे
नदीं गत्वा समुद्रगां प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति १३
॥१४॥ अथाधिकारीविशेषेणाधिकारविशेषं चतुर्दशारत्नेन दर्शयति तातेति ॥१४॥
तातः पिता अंबा माता आचार्यः उपनीय वेदाध्यापकः एभ्यः अनलजलतिला
ञ्जलिदानीत्यनलजलतिलदः एवंविधो ब्रह्मचारी तदीयाशौचं तदीया
शौचाभावान्नवति तदीयाशौचः संनाशौचं शुध्याशुद्धो भवतीत्यर्थः अन्योन्य
स्तु तदः अनलजलतिलदः तदीयाशौचः सन्नाशौचं तेपुनरूपनयनमधि

कं कारयेत् ततोशुद्धो भवतीत्यर्थः भिसंधिः एतच्च आचार्यपितृउपाध्यायान्नि
हृत्यापि व्रती व्रती शकटान्नं च नाश्नीयान्न चैतैः सह संविशेत् हीत्येतद्व्याख्याने
मिताक्षरायां स्पष्टीकृतं अन्ये तु अन्ये ब्रह्मचारिव्यतिरिक्ताः अज्ञातिकेभ्यो यद्य
नलजलतिलान्ददति तदा तत्प्रयुक्ताः शुभाः तदीयाशौचभाजः स्युः तदीयाशौ
तातांबाचार्यकेभ्यो नलजलतिलदो ब्रह्मचारी तदीयाशौचान्येभ्यस्तु त
६ दे पुनरुपनयनं चाधिकं कारयेत्तु अन्ये त्वज्ञातिकेभ्यो यदि द तितदा
तत्प्रयुक्ताशुभास्युः कुर्युः कृछ्रत्रयं चाधमदहनविधौ तेनमवाप्नुवंति १४
चेनैवाशौचवंतस्युरिति तात्पर्यं अधिकं कृच्छ्रत्रयं वापि कुर्युः ततः शुद्धा भवंती
त्यर्थः अधमदहनविधौ यदा अधमदहनकालस्तदा तेतमेव भावं प्राप्नुवंति
तेन ते नाधमेन तुल्या भवंतीत्यर्थः एतच्च नोतमस्तर्पयेतुनीचमिस्त्रन्तं तेभ
दे निर्णीतं १४ अथ देशांतरमृतशरीरालाभे दाहविधिं पंचदशावृत्तेनाह

पालशीमिति आहिताग्निः साग्निकस्यास्थिभिः प्रतिकृतिं तदलाभे शौनकादि
गृह्योक्तविधिना पालाशैः पालनिर्मितां प्रतिकृतिं तां च दग्ध्वा ज्ञातयो दश
हाद्याशौचास्युः तरदृतरेषां अनाहिताग्निनां पालाशस्यादिप्रतिकृतिं दग्ध्वा
ज्ञातयस्त्रिण्यहानि त्रिदिनमाशौचं कुर्युः अत्रोभयत्र वासिष्ठवचनं मूलं आ
हिताग्निश्चेत्प्रवसन्म्रीयेत तत्पुनः संस्कारं कृत्वा शवयदाशौचं अनाहिता ॥१५॥
॥१५॥ ग्नेस्त्रिरात्रमिति सपिंडैर्जरलसंमिश्रैः दग्धव्यश्च कटाग्निना असौ स्वर्गाय
लोकाय स्वाहेत्युक्त्वा सबांधवैः एवं पर्णशतं दग्ध्वा त्रिरात्रमशुचिर्भवेदि
ति च अन्यो वि प्रादिति अन्यो सकुल्यो दशाहाद्याशौच वतां गृहे अद
नं अन्नं अदनं भुजंन् तावतीं दाशौच कृत तेषां यावत्कालमाशौचं पा
लाशीमाहिताग्नेः प्रतिकृतिमथवास्थीनि दग्ध्वाशौचांते तद्व्रतमपि चरेत्

पालाशीमाहिताग्नेः प्रतिकृतिमथवास्थीनि दग्ध्वा दशाहा
आशौचांते यस्य यद्व्रतं विहितं तदपि चरेत् कुर्यात् उभयत्र दशाहानि कुल
स्यान्नं न भुज्यत इति निषिद्धाचरणादिति भावः रोदने त्वेकरात्रं प्रेतसपिंडैः
सरोदने कृते एकरात्रमाशौचं कुर्यात् तथा च पारस्करः मृतस्य बंधुवैः सा
र्धं कृत्वा च परिदेवनं जवर्जये त्तदहोरात्रं दानं श्राद्धादि कर्म चेति १५
× दशाहाद्याशौचाज्ञातयः स्युस्ततरेतरेषां त्रीण्यहान्येव कुर्युः अन्यो
विप्राद्याशौचि सकृद्रुदनमदं स्नाव दाशौच कृत्स्यात् यावत्तेषां तदंते व्रत
मपि चरेद्रोदने त्वेकरात्रं १५
अत्र आशौचशब्देन अशुचित्वं वा विना स्पर्शत्वस्य प्रतीतो रूढ्या जाताया ज
न्माशौचे तदपवादे षोडशावृत्तेनाह जन्मनीति जन्मनिमित्ताऽस्पृश्यता कु
लश्रुवा सपिंडानां सोदकानां च न भवति किंतु मातृवर्ज मातुः सूतिकायाः
अस्पृश्या नायाभवेवत्येवेत्यर्थः पितुर्विशेषमाह स्नानादूर्ध्वं सचेला स्नाना

दूर्ध्वं पितुरूपस्पृश्यता नो भवतीति पूर्वेणा संबंधः तथा च संवर्त्तः जाते पुत्रे पि
तुः स्नानं सचैलं तु विधीयते माता शुध्येद्दशाहेन स्नानात्तु पर्श्यनं पितुरिति
अंगिराश्च सूतके सूतिकावर्ज्यं संस्पर्शनं निषिध्य तद्रात्रि मृताशौचेप्यस्पृश्य
त्वे संकोशमाह अथेति निधनकृताशौचके मरणनिमित्ताशौचे अन्त्ये त्रिभा
गादिके त्रिभागे त्रिधा विभक्ते पूर्वांशस्योपरि प्रथमांशादुपरितनं यद्भाग
द्वयं तत्रास्पृश्यता नो भवतीति संबंधः इत्थं महति च महति च दशाहादिके पि इत्थं
॥१६॥ त्थमेव यदि संचायनं आस्थिसंचयनं प्रथमादिने एव वृत्तमासीत् तदैवायं ॥१६॥
विभाग लक्षणप्रकारः नो चेत् यदि तु न तं कृतं स्यात् तर्हि तस्योपरिष्टात् आ
संचयनानंतरं दिनानां त्रिधा विभज्य प्रथमभागस्य कृत उत्तरभागद्वये अस्पृ
जन्मन्यस्पृश्यता नो भवति कुलानुक्रमात् वर्ज्यं पितुस्तु स्नानादूर्ध्वं सचैलाद
धनिधनकृताशौचके अन्त्यत्रिभागे पूर्वांशस्योपरांशे महति च यदि संचायनं वृत्त
मासीत्तदा चेत्तस्योपरिष्टादथ तु गृहजयोर्दासयोरास्नुवोर्ध्वं १६
चे

श्यता नो भवती पूर्वभागे तु भवत्येवेति तात्पर्यं स्वाशौचकालाद्द्विगुणेयं स्पर्शनं तु
त्रिभागतः शूद्रविट्क्षत्रविप्राणां यथाशास्त्रं विधीयत इति स्मरणात् तथा द
शाहादि त्रिभागेनेकृते संचयनेक्रमात् अंगस्पर्शनमिच्छंति वर्णानां तत्त्वद
र्शिनः त्रिचतुःपंचदशभिः स्पृश्या वर्णाः क्रमेणेति देवलस्मरणात् अस्य तु
अथेत्यधिकारांतरे गृहजयोः स्वगृहोत्पन्नयोः दासीदासयोः सम्यग्वोर्ध्वं स्ना
॥१६॥ नांतरं अस्पृश्यता नो भवतीति संबंधः १६ दासत्वेदनास्पृश्यत्वकालं दसमद
शवत्तपूर्वार्धे नाह अन्नेनेति अन्नेनोपात्तयोरन्नदानेन गृहीतयोर्दासीदास
योस्तु त्रिरजनीचरणात् रात्रित्रयगमनादूर्ध्वं अस्पृश्यता नो भवतीति पूर्वश्लोके
गतेनान्वयः तुशब्देन पूर्वस्माद्विशेषद्योतकः दत्तदासादिकानां स्वाम्याशौचा
सेरव्यासमादिनगमनादूर्ध्वमस्पृश्यता नो भवतीत्येवान्वयः आदिशब्देन
द्व्यादिक्रीतानां संग्रहस्वामिनो यान्याशौचदिनानि तेषां दिनानामतिक्रम
णादूर्ध्वमिस्पर्शः अन्यत्तु सूक्तं दासस्य स्वसाध्यकर्मण्ययोग्यता न तु कर्म

धिकारे तथा सूतिकायाः दास्याः स्वप्रसवनिमित्तमस्पृश्यत्वं मासमित्येतत्सू
तकं स्पष्टं दासाद्याशौचे सद्यः शुध्यात् गर्भदासो न दासस्पृष्टात् शुद्धिरिति स्मृ
तिः तथा दासिदासश्च ससर्वो वै यस्य वर्णस्य यो भवेत् तद्वर्णस्य भवेच्छौचं दास्याः
मासं तु सूतकमित्यंगिरावचनमूलं इदानीं जाताशौचे जननिमित्तं यत्कार्यं तन्
त्र शुद्धिमुत्तरार्द्धेनाह जातेऽपत्य इति अपत्ये जाते तन्मंगलार्थेषु तस्यापत्यस्य
मंगलकर्मसु तस्मिन्नहनि तस्यामेव निशि च योग्य इत्यन्वयः अयमर्थः अप ॥१७॥
॥१७॥ त्यमंगलार्थानि कर्माणि यस्मिन्दिने यस्यां च निशि विहितानि तेषु प्रथमदिना
दिसाध्येषु कर्मसु सर्वसूतिकिनस्तस्मिन्काले योग्या अधिकारिणो भवन्तीति
तथा च सर्वाकं सूतिकावासनिलया जन्मदानामेद वता ताससा यागनि
मित्तार्थं शुद्धिर्जन्मनि कीर्तिता प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा त्रिष्वेत
षु न कुर्वीत सूतकं पुत्रजन्मनि कीर्तिता प्रथमे दिवसे षष्ठे दशमे चैव सर्व

दा उक्ताशौचस्य सर्वपुरुषविशेषापवादमाह सर्वाशौचमिति एतत्सर्वमा
शौचं सर्वदा सर्वकालं यतिः संन्यासी वनिवानप्रस्थः ब्रह्मचर्यस्थितऊनयाचि
धो ब्रह्मचारी एतेषां नो भवती एते यस्मादयोन कथंचिदषाशौचभाजो भवं
तीत्यर्थः अन्नेनोपात्तयास्तु त्रिरजनि चरणाद्दत्तदासादिकानां स्वाशौ
चाद्ध संख्या समदिनगमनादूर्ध्वमन्यत्तु सूतकं जातेऽपत्ये तु तस्मिन्नहनि निशि
च तन्मंगलार्थेषु योग्याः सर्वाशौचं सदा नो भवति यति वनि वै ब्रह्मचर्यस्थि र्ये
तानां १७ श्लोकः अथ येषु येषु कार्येषु येषां सूतिकिनां तदा तात्कालिकी शु
द्धिस्तेषां नामष्टादशचक्रेणाह तत्तत्कार्येष्विति येषां यानि यान्यजीवि
तार्थविहितानि तेषां तत्तेषां तेषु कर्तव्येषु अनन्यसाध्येषु सर्वाशौचं सदा नो
नवतीति पूर्वश्लोकगतेनान्वयः अत्र सत्रिणः अत्र सत्रप्रवृत्ताः व्रतिनः प्रारब्धप्रा
श्चित्तलक्षणव्रताः नृपो राज्याभिषिक्तो नृपवान् राजसेवकः दीक्षितो यागक

र्त्विजः अध्वर्य्वादयो यज्ञकर्तारः अनेकक्रतिपठनो बहुवेदशाखाध्ययनशीलः
आतुरो रोगी अन्ये तु प्रसिद्धाः एषां सद्यःशौचं भवतीत्यर्थः संप्रारब्धेष्विति दा
नादयउत्सवान्ताः प्रसिद्धाः एतेषु संप्रारब्धेषु निःपाद्यमानेषु तदर्थे एतन्निमित्तेक
तत्कार्येषु सत्रिदीक्षिव्रतिनिष्पन्नयवद्दीक्षितर्त्विकृच्छ्रदेशमन्त्रशापत्स्व तेष्वनेक
क्रतिपठनमिषद्वकारुशिल्प्यातुराणां संप्रारब्धेषु दानोपनयनयज्ञनश्रा
द्धयुद्धप्रतिष्ठाचूडातीर्थार्थयात्राजपपारायणमन्नाद्युत्सवेष्ठ तत्तदर्थे १८ ॥१८॥
॥१८॥ र्थेतैः सत्यादिभिः संसाध्यमाने कार्ये इति यावत् एतेषां सद्यःशौचं भवतीत्यनेनै
व संबंधः तथा च याज्ञवल्क्यवचनं ऋत्विजां दीक्षितानां च याज्ञियं कर्म कुर्वतां सत्री श
व्रती ब्रह्मचारी दाता ब्रह्मविदां तथा दाने विवाहे यज्ञे च संग्रामे देवविप्लवे आपद्य
पि च कष्टायां सद्यःशौचं विधीयत इति कष्टापदो दुर्भिक्षाद्याः तथा प्रचेतोवचन
मपि कारवः शिल्पिनो वैद्या दासीदासास्तथैव च राजानो राजभृत्याश्च सद्यःशौचाः

प्रकीर्तिता इति १८ इदानीं मृत्युविशेषादाप्याशौचापवादमेकोनत्रिंशदर्द्धेनाह ना
शौचा इति पतितास्य स्मृत्यंतरोक्ता स्यपत्यादिघातिनीषु स्त्रिषु मृतासु प्रसूतासु
वा ज्ञातयः सपिण्डा शौचा आशौचमाचेन स्युः तथा दोषान्दोषेण हेतुना ये पा
खंडं वेदानुक्तधर्माभासमाश्रयंते ते पाखंडिनः अविहितलिंगधारिण इति
यावत् चेराः अननुज्ञातद्रव्यहराः आश्रमरहिताः सत्यधिकारेप्यकृताश्र
मपरिग्रहाः सुरापेयाः निषिद्धसुरापारताः हीनोपगः अधमेन सह भोगरताः
आसमृतासु च ज्ञातयो नाशौचा स्युरिति पूर्वेण संबंधः अत्रालिंगमविवक्षितं
तथा सर्पागवैः तस्मात् दर्पेण बुद्धिपूर्वकं सर्पादीन् द्विनाकीर्तिभिंजालः दंत दं
ता नपकर्तुमाभिमुखाननयप्रवृत्ताः संतः ते हताः तेषु मृतेषु नाशौचा ज्ञातयस्स्युः
एभिर्द्विवाद्यतेषु नदमित्यर्थः तथा स्वेच्छापूर्वेशस्त्रलोतः बलिनो अग्निः जलं वा

रिविषं वत्सनागादि अनाशकं अविहतोन्नत्यागः आदिशब्दाद्विहितमनुपाता
दिलक्षिः प्रकैर्मृतेषु विज्ञातयो नाशौचास्कारिस्यन्वयः पारंवद्ध नाग्निर्नास्ति नान्नत
द्भ्यः काणगादिकाः स्कराप्यश्राप्यस्मन्यागिन्यो नाशौचोदकनाउ नाइति योगिश्वरस्म
रणात् १९ इदानीमाशौचीनां यदुपादेयं नद्विंशति तमवृत्तेनाह नाशौच्यमिति
नाशौचाज्ञातयस्य पतितपतिस्रुत ब्रह्मविद्वांतिनीषु दोषात्या स्वंडु चौराभ्रमरहि ॥१९॥
॥१९॥ तस्कराये यहीनोपगास्र संदर्पात्सर्पविप्रक्षितिपपशुदिवाकीर्तिकाद्यैर्हतेषु
स्वेच्छापूर्वंच शस्त्रज्वलनविषानाशकाद्यैर्मृतेषु १९
यातिगतिः मरणमिति यावत् जातं जन्म तंनिमित्तमाशौचं यात्तजाताशौचं तस्मिन् स
त्यपि मेवा अनुगमनादिकृते वाशौचे एषु शावादिघामभोज्यांतेषु इत्येषु आशौचं
संबंधिदोषो न स्यात् एतानि सर्वाशौचेष्वपि नाश्नुद्धानी खनि प्रायः अत्र च षड
पि समस्यंत पदानि नाशौच मिस्यनेन कादीनि स्वयमाशौचरहितः पुमानन्येभ्यो

दद्यात् स्वयं चाद्याच्च एवं कृते दोनं भवतीत्यन्तिसंधिः तथापणितमयपणितं
स्वपुंण्यं शुचिस्यादितिस्यष्टा यथाह मरीचिः लवणे मधुमांसे च पुष्पमूले
नाशौचं शाककाष्ठाजिनलवणतृणक्षीरनीराम्भिषेषु पुष्पमूले फलेचौ
षधि दधि मधुषु स्यात्तिले ष्वामभोज्ये दद्याद्द्यादिमानि स्वयमनुमनना
त्स्वामिनो यातिजाताशौचेवाकृत्रिमे वापणितैश्चापि सर्वैः शुचिस्यात् २० मपणितं
फलेषु चर्ण। शाककाष्ठतृणेष्वप्सु दधिसर्पिपयःसु च तिलौषधाजिने चैव पक्वाप
क्वे स्वयंग्रहः पण्येषु चैव सर्वेषु नाशौचं मृतसूतके इति अत्र पक्वमस्सजानं अ
पक्वं तंदुलादि एतत्पक्वाभ्यनुज्ञातमं नः सत्त्रप्रवृत्तविषयं ज्ञेयं अनसत्त्रप्रवृत्ता
नामामममन्नमगार्हितं भुक्त्वापक्वान्नमेतेषां त्रिरात्रं तु पयः पिबेत् इत्यंगिरोवचनात् २०
इदानीमग्निरूपादेयानुपादेयत्वमेकविंशति वृत्तेनाह उत्तारण्यग्निनेति अर्वा
परिणयनाद्यपिः विवाताकृष्णाद्कृउत्तारण्यग्निनादाः कार्यः उत्तसमये यारणिस्य

अथ नोत्संनेति यावत् विवाहादूर्ध्वं आधानकालात्प्रागनाधानादनाग्नेरहि
णावेवाह्नेनाग्निनादग्धिः ततऊर्ध्वं तु आधानकालादनंतरं विध्याहितहुतवह
नेर्विधिनाआहिताः विध्युक्ताधानाख्यसंस्कारैः संस्कृतायेदक्षिणाग्न्यादस्त
स्त्रयस्तैरेवदग्धिः लौकिकेति एतेषांऊातरण्यग्न्यादीनामभावेलौकिकेना
संस्कृतेनाग्निनादग्धिरित्यन्वयः तदुक्तं वृद्धयाज्ञवल्क्येन आहिताग्निर्यथा
॥२०॥ न्यायं दग्धव्यस्त्रिभिरग्निभिः अनाहिताग्निरेकेना लौकिकेनापरोजनइति ॥२०॥
कश्चिल्लौकिकाग्न्यपवादमाह चंडालाग्निमिति प्रेतदग्धौ चंडालाग्न्या
दीनुल्यांनोपप्रदद्यात् तदुक्तं देवलेन चंडालाग्निरमेध्याग्निः सूतकाग्निश्च का
हिचित् पतिताग्निश्चिताग्निश्च न शिष्टहरणोचितइति इंधनादावप्यपवा
दमाह शूद्राहृतेनेत्यादि इंधनं काष्ठं घृतमाज्यं आदिशब्देन पयः प्रभृति यदुप

युज्यते तत्संग्रहः शूद्राहृतेनेंधनादिनायोदाहः सोप्यदाहइतियोजना कृतोप्यकृत
एवेत्यर्थः तथाचाहयमः यस्यानयाशूद्रोग्निंतृणकाष्ठहवींषिच प्रेतत्वं हि सदात
स्यचाधर्मेणालिप्यतइति २१ अथ द्राविशवत्रेनदहनेतिकर्तव्यताधिकारिणावा
ऊातारंण्यग्निना वा कचरिणयन विधेर्दग्धिराधानकालाद्वूर्ध्वेणार्ध्वंतुविध्याहित
हुतवहनेलौकिकेनाग्न्यभावे चंडालाग्निंचिताग्निंपतितदुक्तमुक्तं सूतिकाग्निमप्येव
कुंऊल्याशूद्राहृतेनेंधनदहनघृताद्येनदाहोप्यदाहः २१
त सर्वमिति एतत्सर्वं दाहादिकृत्यं उपनयनविधेः प्राक्तूष्णीममंत्रकमेव विदध्यात् त
थाचाल्केकोगाक्षिणा तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव वेति परं तूपनयनानंतरं
स्वगृह्योक्तैस्तद्विधानैर्विदध्यादित्यादितिस्पष्टं अत्रच उपनतश्चेदाहिताग्न्यावृत
पर्वादितियाज्ञवल्क्यवचनमनुसंधेयं इदानीमधिकारिणो निरूपयति सकलेति

सकलं सर्वं शवविधिं प्रथमदिनमारभ्य दशाहांतं स्वगृह्योक्तं कर्म ज्येष्ठपुत्रो नुपस्या वरो
वा विदध्यादिति संबंधः पुत्राभावे कर्तृविशेषं दर्शयति क्रमेणेति क्रमेण पूर्वाभावे पर
त्वनुक्रमेण स्वकुलजः सपिंडः सोदको वा तदभावे अनन्यावंश्यः वंशजः तदभावे शिष्यः
तदभावे ऋत्विक् तदभावे आचार्यो विदध्यादिसन्वयः सकलं सनेन दशाहांतं कर्तव्ये
दो न कार्य इति सूचितं तथा गृह्यपरिशिष्टे असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पु
मान् प्रथमेऽहनि यो दद्यात्स दशाहं समापयेदिति अस्यार्थः तस्य पुत्राभावे सपिंडः
॥२१॥ शिष्यास्त्र दद्यात्तदभावे ऋत्विगाचार्यो वेति इदानीं देशनियममाह यत्रेति यत्र य ॥२१॥
स्मिन्देशे प्रथमदिनविधिं कुर्यात्सोपि स एव देशः तत्सूतकां दशाहपर्यंतं कर्माह
निशेषः यत्र प्रथमदिनकृत्यं कृतं तत्रैव दशाहपर्यंतं समापनीयमित्यभिसंधिः अ
त्र देशनियमे शिष्टाचारो मूलमित्यनुसंधेयं २२ अनाम्न इति अनाम्नः नामकरणा
त्प्राक् उपरते मृते खननमा[illegible]ं खननमेव वा मात्रशब्दार्थः स्पष्टयति नजलदूतव

हाविति स्पष्टं नामवर्षत्रयांतः नाम नामकरणं तत आरभ्य वर्षत्रयांतः वर्षत्रयमध्ये
उपरते जलदूतव हेःकात्तु स्वेच्छया नुष्ठेयो न नियतो ऊर्ध्वं वर्षत्रयानंतरं तु आकृतचू
डापुपरते नित्यो नियतो भवतः कृतचौले विशेषमाह चौलयुक्ते नित्यो कालाविशेषादि
ति कालाविशेषाद्वर्षत्रयात्प्रागपि कृतचौले नित्या नित्यं ततः खननविधिमाह अथेति

सर्वं स्त्री विदध्यादुपनयनविधेः प्राक्परं तु स्वशाखागृह्योक्तैः स्वाद्विधानैः सक
लशवविधिं ज्येष्ठपुत्रो वरो वा पुत्राभावे क्रमेण स्वकुलजः ननीविंश्य शिष्योर्त्वि
ग्वाचार्यो वा यत्र कुर्यात्प्रथमदिनविधिं सोपि तत्सूतकांतं २२

पितृमुखाः पितृमुख्याः खनने योग्यं प्रेतं स्नापयित्वा अथानंतरं अंबरस्रगंधा
द्यैः शोभयित्वा आज्येनालिप्य निखनेयुरिति शेषः अत्र मूलं ऊनद्विवर्षं निखनेन्न
कुर्यादुदकं ततः इति याज्ञवल्क्यवचनं तथा ऊनद्विवर्षं प्रेतं निदध्युर्बान्धवा बहिरि
ति अलंकृत्य शुचौ भूमावस्थिसंचयनादृते नास्य कार्योग्निसंस्कारो नापि कार्या

॥

दद्युः क्रिया अरण्ये काष्ठवत्क्षिप्त्वा क्षपेयुस्त्र्यहमेव चेति मनुवचनं तथा ऊनद्विव
र्षिकं प्रेतं घ्नतां क्षिं निखनेद्बहिः यमगाथां गायमाना यमसूक्तमनुस्मरन्निति यमस्म
रणं चापि विधेयं २३ इदानीं शवनयने वर्णविशेषेण द्वारविशेषमाह प्रत्यग्द्वारेति
अनाम्नः खानमात्रं न जलकृतवहौ नाम वर्षत्रयान्तः कामं चोर्ध्वं तु निखेयत्वनु उप
रेचौलके चोलयुक्ते नियोकालादि विशेषादयापि तु मुखराः स्नापयित्वां वरस्त्र
गंधाद्यैः शोभयित्वा मृतमथ खनने योग्यमाज्यैर्विलिप्य २३
॥२५॥ अवनीसुरं ब्राह्मणं मृतं नगर्याः प्रत्यग्द्वारापश्चिमद्वारेण बहिर्नीत्वा प्रापयित्वा सर्वज्ञात ॥२२॥
यो वर्षीयः पूर्वं वृद्धपुरःसरं यथाभवत्येवमनुयायुरनुगच्छेयुः अयमनुगमननियमो
द्विवर्षाधिकवयो मृते ज्ञेयः तथा च याज्ञवल्क्यः आश्मशानादनुव्रज्य इतरो ज्ञाति
भिः वृत्तामिति क्षत्रियं तु उत्तरद्वारेण वैश्यं तु प्राग्द्वारेण वृषलं शूद्रं पित्र्यदिशि
दक्षिणस्यां दिशि यद्द्वारं तेन नापयित्वा सर्वज्ञानयो वर्षीयस्य न्वयः तथा च स्मृतिः

दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् पश्चिमोत्तरपूर्वैस्तु यथासंख्यं द्विजात
य इति इदानीं वयोविशेषेण तस्यानुगमननियमापवादमाह ऊनद्विशरदुपर
ताविति ऊनद्विसत्यां अनुयाने नुगमने नियामो नियमो नास्ति तदुपरतावनुगम
प्रत्यग्द्वारान्नगर्या बहिरवनिसुरं क्षत्रियं तु उत्तरेण प्राग्द्वारेण वैश्यं पित
दिशि वृषलं नापयित्वानुयायुः वर्षीयःपूर्वमूनद्विशरदुपरतौ नानुयानेन नि
यामः शूद्रैः स्पृष्टो थ वोढा यदि भवति मृतः प्रेतभावान्नमुक्तिः २४ नार्थिकमतो
न कर्तव्यता नावश्यकी भवतीति यावत् अत्रापि पूर्वोक्ता याज्ञवल्क्यस्मृतिर्मूलं अत्र
शूद्रकृतस्पर्शवहनयोर्दोषमाह शूद्रैः स्पृष्टो अथ वोढा यादीति यदि मृतः प्रेतः शूद्रैः
स्पृष्टो थवा उढो भवति तदा तस्य प्रेतभावान्न मुक्तिः एतन्नु सत्सु ब्राह्मणादिष्विति
ज्ञेयं तथा च मनुः न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत् अस्वर्ग्या ह्याहुतिः सा स्या
च्छूद्रसंस्पर्शदूषितेति २४ इदानीमुदकदाने विशेषं पंचविंशावृत्तेनाह ज्ञातीना

मिति ज्ञातयः सपिंडाः सोदकाश्च मातापितरौ प्रसिद्धौ परमगुरुराचार्यो मातामहश्च
एषामंभउदकदानं नित्यं अयमर्थः सपिंडानां सपिंडोद्देशेन सोदकानां सोदकोद्दे
शेन दौहित्रस्य मातामहोद्देशेन च मदुकदानं तं नित्यमिति अथाह याज्ञवल्क्यः समा
मादृशामा द्वापि ज्ञातयोभ्युपयंत्यपइति तथा एवं मातामहाचार्यप्रेतानामुदकक्रि
येति इरस्त्रनियमाभावमाह अथमित्रेति मित्रं सखा प्रत्तापरिणीता दुहिता स्वसा
स्वस्त्रियादयः प्रसिद्धाः एषामंभोदानं यद्येच्छं इच्छया भवति न नियतं यथा याज्ञ
॥२३॥ वल्क्यः कामोदकं सखिप्रत्तास्वस्त्रियश्वशुरर्त्विजामिति केषांचिदुदकदानेकर्तृत्वाप ॥२३॥
वादमाह नव्रात्येत्यादिना व्रात्यः सावित्रीपतीन्त आचार्यादयः प्रसिद्धाः एते प्रेतायो
ऽदकं न दद्युरित्यन्वयः ते कद्दस्यपेक्षायामाह येत्विति येतु यत्र प्रेतसंगे पिंडानिजल
कंथदानर्हकाः पिंडाद्ययोग्याः तेष्वुदकादि न दद्युरिति तेषिक इत्यपेक्षायामाह ते
तितितेतु पुनः स्मृताः पूर्वोक्ताः एव तथा च स्मृति न ब्रह्मचारिणः कुर्युः रुदकं पतितानचेति

वृद्धमनुरपि क्लीबाद्या नोदकं दद्युस्तेनाव्रात्या विधर्मिणः गर्भभर्तृद्रुहश्चैव सुराप्यश्चै
वयोषितइति २५ षड्विंशेन संस्कारांतरं यत्कार्यं तदाह संस्कृत्येति ते सकलकुल
ज्ञातीनां मातापित्रोरपि परमगुरोर्नित्यमंभोपि मित्रप्रत्तास्वस्त्रीयश्वशुरगुरु
सुहृद्याजकानां यथेच्छं नव्रात्यब्रह्मचारीव्रतियतिपतितक्लीबपाखंडचोरा
दस्युर्येत्वत्र पिंडानलउलकथेनानर्हकास्ते तु स्मृताः २५
सुवः सर्वज्ञातया बालपूर्वं बालप्रमुखाः प्रेतं संस्कृत्य दाहयित्वा संस्कारस्थलीमनीक्ष
माणा नादेयपयसि व्रजित्वा वृद्धपूर्वं वृद्धपुरःसरं यथा भवति एवं सवसनाः सव स्त्राः
एकवारं निमज्य पाषाणात्रिवारं सकृत वारंवा प्रतिदिनं प्रत्यहं दशदिनावधि उदकं द
द्युः रन्तिनिसे बंधः उदकदाने वर्णविदेन दिङ्नियमं विशादयितुं तान्विशिनष्टि ब्राह्म
णाइत्यादीना ब्राह्मणाम्भवति दक्षिणास्याः दक्षिणामुखाः क्षत्रियम्भवति दक्षु

ख्वाः शिशवैश्यस्तु तर्पयति प्राङ्मुख इति अत्र मूलं यथा विभागं शरीरमग्नौ संयोज्यानवे
क्षमाणा अपाप्य पर्यंतीति शातातपस्मृतिः प्रेतस्य बांधवा यथा ह्युदकमवतीर्याद्ध
र्षयेयुदकांते प्रसिंचेयुरपसव्ययज्ञोपवीतवाससोद क्षिणाभिमुखाः ब्राह्मणस्योदङ्मुखाः
प्राङ्मुखाः क्षत्रियवैश्ययोरिति प्रचेतो वचनं तथा सकृत्प्रसिंचंत्युदकं नामगोत्रेण वा
ग्यता इति याज्ञवल्क्यस्मृतिरपि त्रिः प्रसेकं कुर्युः प्रेतस्यपाहिति प्रचेतो वचनमविभ
॥२५॥ लं २६ इदानीमुदकदानानंतरं पुनरपि स्नायुः स्नानं कुर्युः ततस्तैर्यत्कर्तव्यं तदाह ॥२५॥
त्रिनिशर्ममिति त्रिनिशं त्रिदिनं अनशनाः अभोजनाः संतः अहर्निशमेकमहोरात्रं वा
अनशनाः क्रीतोत्पंनाशना वा संतः क्रीतं क्रयेण प्राप्तं उत्पन्नमयाचितं प्राप्तं तदशनाः
आमिषलवलैंणपयःक्षारमंन्नं त्यजेयुः एतस्य ष्टं तथाच्छ्रीसंगं मंगलानि व्यसनेह
सनानसंत्यजेयुरिति संबंधः तथा उद्गादनोद्यासनान्यपि त्यजेयुरिति पूर्वेण संबंधः

अथ निशाद्यमाह तार्णास्तीर्णाक्षितो तइति तृणानिर्मिन्नमास्तरणं तेस्तीर्णायासिति
र्भुमिस्तत्राति नियताः ब्रह्मचर्यादिनियमयुक्ताः पृथक्स्व विशेयुः स्वपेयुः स्वपेयुः स्वपम
न्यत अत्र चक्रीतलब्धाशनाभुमौ स्वपेयुस्ते पृथक् पृथगिति याज्ञवल्क्य वचनं तथा
गृहान्वर्जित्वाधः प्रस्तरे व्रतमन्नमश्नंत आसीत क्रीतोत्पंनेन वा वर्तेरन्निति वसिष्ठ
वचनं अक्षारालवणान्नास्युर्निमज्जेयुश्च नेत्यतं मांसाशनं चनाश्नीयुः शयीरंस्ते पृथक्क्षिताविति
संस्कृत्यानीक्षमाणा सकलकुलमुखोबालपूर्वं व्रजित्वा नादेयेचदूर्ध्वपिषयसि सवसना
एककैवारं निमज्ज्य पाषाणोत्रिः सकृद्वा प्रतिदिनमुदके ब्राह्मणो दक्षिस्याः क्षत्रे
तुदङ्मुखा वेमनवति विशितु प्राङ्मुखास्तेददीरन् २६ तिमनुवचनात्
तथा अधः शय्यासनीनो ब्रह्मचारिणश्च वसर्वइति गौतम वचनं मूलमिस्त्वनुसंधेयं
२७ इदानीं दशाहसंबंधिविधिमष्टाविंशतिवचनेनाह संस्कृत्येति संस्कर्तादाहकः
मिदह ननः दहनदिनानंतरं प्रत्यहं प्रतिदिनं दशाहावधि दर्भपुंजे भूमावेवास्तेने

दर्भसमुदाय एवैकं पिंडं समध्य याधामवतितथा आवपेत् दद्यात् तथा च स्मृतिः न
वमादिवसे दद्यान्नवपिंडान्समाहितः दशमं पिंडमुत्सृज्य रात्रिशेषे शुचिर्भवेत्
स्नायुर्नुयोऽपि नत्र त्रिनिशाम नशनाद्धातयोर्हनिशं वाक्रीतोत्पन्नाशनावामिष
लवणपयःक्षारमन्नं त्यजेयुः स्त्रीसंगमंगलानि व्यसर्हे सनस्समुद्रादनोच्चा
सानानितार्णास्त्रीर्णाक्षितौ नेपृथगितियताः संविशेयुर्निशायां २७

इति अत्र भूमावित्यनेन पाषाणादिव्यावृत्तिः सूचिता तथोक्तं शंखेन भूमौ माल्यं पिंडं
॥२५॥ पानीयं च घटे इति पिंडदाने द्रव्यादनियममाह प्रथमेति प्रथमदिने यत् द्रव्यं तेन दे ॥२५॥
वोपरिष्टात् यावद्दशाहं कर्तव्यं न तु द्रव्यांतरमुपादेयमिति यावत् तदुक्तं शुनः
पुच्छमुनिना शालिनासक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत् प्रथमेहनि यद्द्रव्यं त
देव स्याद्दशाहकमिति अथ चयनकालमाह दाहाद्यादेवेति चयनदिनं दाहाद्या
देवगण्यं न तु मरणादिनात् अस्थिसंचयनं दाहाम् ताहस्तु यथातिथीत्योग

रो वचनात् इदं चयनं आदितः यानि चत्वारो वा दिवसानां मध्ये एकस्मिं दिने दाहतः
सप्तमे वा तत्र नवमे वा कार्यमिति विशेषः तथा च संवर्तः प्रथमेह्नि तृतीये वा सप्तमे नव
मे पि वा अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सहेति स्मृत्यंतरे वा द्वितीये वास्थिसंच
संस्कर्ता दर्भपुंजे समध्य दहनतः प्रत्यहं पिंडमेकं भूमौ वेवावपेत प्रथमदिने च
रू द्रव्यमेवोपरिष्टात् दाहाद्यादेवगण्यं चयनदिनमिदं चादितो द्वौ चतुर्णामि
वास्मिन्सप्तमे वाहनि नवमे दिने वानुपेते तु नेतत् २८
यद्इति विद्धुरपि चतुर्थे दिवसेस्थि संचयं कुर्यात्तेषां गंगांभसि प्रक्षेप इति २९
अथैको नविंशेन वृत्तेन वपनादिविधिमाह वर्षीयसीति वर्षीयसि वृद्धे संस्थि
ते सति तु पुनः सूनवः दशमेहनि उपरि वपनं न खलु छेदनं कनीयांसः कुर्युरिति
शेषः उपवपनं कुर्वन्ति न खलु केशश्मश्रुवपनं वा अथवा केनचिन्मध्ये आशौच मध्ये
द्वितीये तृतीये पंचमे सप्तमे वा दिने कर्तव्यमित्याचुरिति तथा च देवलः दशमेह

निसंप्राप्ते स्नातं ग्रामाद्बहिर्भवेत् तत्रस्याज्यानिवासांसि वेशश्मश्रूनखा
निचेति तथास्यानंतरमपि द्वितीयेहनि कर्तव्यं क्षुरकर्म प्रयत्नतः तृतीये
पंचमे वाथ सप्तमे वा प्रदानतरूति एवपनेनिमित्तविशेषेणावश्यकता
पर्षीयस्तु द्वितेतु परि वपनन खछेदनं सूतकांते मध्येवा केचिदूचुः
पितृपरमगुरुष्वेव वापादिनित्यं अत्रस्मार्तेश्शुभार्थे भणितमभणिते
स्वस्वगृह्योविदितात्वादानंचदद्यादशुभंयस्सिदेभूसुरेभ्यः शुभार्थं २९
॥२६॥ माह पितृपरमगुरुष्वेव वापादिनित्यं एषेवसस्थितेषु वापादिनित्यं आचेस ॥२६॥
कंपुत्रादीनां नेतरत्रेतिभावः तदुक्तं गंगायांभास्करक्षेत्रे मातापित्रोर्गुरोर्मृ
तो आधानकाले सोमे च पवनं सप्तसु स्मृतं तदूति सूतकांतेयत्कर्तव्यं तदाह अ
त्रेति अत्रयत्स्मार्तैक मे कर्तव्यतयामयोक्तं यच्चनोक्तं तत्स्वगृह्योक्तं विदित्वा स्वा
नुष्ठीय पश्चात् अशुभभयभिदे अशुभनाशाय शुभार्थं शुभमाप्तये चभूसु

रेभ्योदानं दद्यात् स्पष्टमेतत् २९ अथत्रिंशत्तमवृत्तं सपिंडाः परशव वेतनस्नापकाश्च
पिंडं तैर्दत्वातद्वेश्मवर्जित्वाऽस्यद्वारि प्रशमितमनसः संस्नातस्तदनंतरं निंबपत्रं विदश्य
पश्चादाचम्य अनंतरमग्न्यंबुदूर्वांकुरवरवृषभान् अक्षतान् गोमयं च स्पृष्ट्वा सि
द्धार्थं तैलान्यपि स्पृष्ट्वा दृषदि पदं न्यस्य सर्वे गृहं प्रविशेयुरिति संबंधः॥ दत्वा पिंडं सपिं
डाः परशव वेतनस्नापकाश्च वर्जित्वा तद्वेश्मद्वारि चास्य प्रशमितमनसो निंबपत्रं वि
॥२७॥ दश्य आचम्याग्न्यंबुदूर्वांकुरवरवृषभानक्षतान् गोमयं च स्पृष्ट्वा सिद्धार्थं तैलान्यस्य ॥२७॥
दृषदि पदं न्यस्य सर्वे विशेयुः॥३०॥ तथाचस्मृतिः इति संस्मृत्य गच्छेयुर्गृहं बालपुरः
सराः विदश्य निंबपत्राणि नियता द्वारि वेश्मनः आचम्याग्न्यादिसलिलं गोमयं गौ
रसर्षपान् प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैरिति ३० इति श्रीमत्रिंशच्छ्लो
कीविवरणं संपूर्णं शुभंभवतु श्री श्री श्री श्री श्री

टीका

॥ त्रिंशश्लोकी समाप्ता ॥

शौचनिर्णयः

492